# Shri Vidya Ganesha Ashtottarashatanama Stotram

# શ્રીવિદ્યાગણેશાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Shri Vidya Ganesha Ashtottarashatanama Stotram

File name : vidyAgaNeshAShTottarashatanAmastotram.itx

Category : ganesha, aShTottarashatanAma

Location : doc_ganesha

Proofread by : Sreenivasa Rao Bhagavatula

Description-comments : From stotrArNavaH 01-09 mahAshaivatantre atirahasye AkAshabhairavakalpe

Latest update : February 13, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 13, 2021

*sanskritdocuments.org*

# શ્રીવિદ્યાગણેશાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીમદ્વિદ્યાગણેશસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
વક્ષ્યામિ શ઼ૃણુ દેવેશિ સાવધાનેન ચેતસા ॥ ૧॥

સર્વપાપપ્રશમનં સર્વવિઘ્નનિવારકમ્ ।
સર્વરોગહરં દિવ્યં સાધકાભીષ્ટદાયકમ્ ॥ ૨॥

બ્રહ્માદયઃ સુરાઃ સર્વે વસિષ્ઠાદ્યા મુનીશ્વરાઃ ।
વિદ્યાગણાધિનાથસ્ય ચક્રારાધનતત્પરાઃ ॥ ૩॥

સ્તોત્રેણાનેન સમ્પૂજ્ય જપ્ત્વા રવેઃ પદે સ્થિતાઃ ।
સુખિનોઽદ્યાપિ દૃશ્યન્તે સદ્યઃ સન્તુષ્ટમાનસાઃ ॥ ૪॥

તાદૃશં પરમં દિવ્યં પ્રત્યક્ષફલદાયકમ્ ।
યઃ પઠેત્ પ્રાતરુત્થાય ચિન્તયેન્મૂનિ બાલકમ્ ॥ ૫॥

સ સર્વદુરિતાન્મુ(ક્ત્વા)ક્તો સર્વાન્ કામાનવાપ્નુયાત્ ।
ચક્રપૂજાવિધાનેન પ્રયાણે સમુપસ્થિતે ॥ ૬॥

શોભનેષુ સમસ્તેષુ કાર્યેધ્વન્યેષુ બુદ્ધિમાન્ ।
સ્તોત્રેણાનેન સમ્પૂજ્ય જપ્ત્વાભીષ્ટમવાપ્નુયાત્ ॥ ૭॥

ધાન્યકામી લભેદ્ધાન્યં ધનકામી ધનં લભેત્ ।
સન્તાનકામી સન્તાનં ક્ષેત્રાર્થી ક્ષેત્રમુત્તમમ્ ॥ ૮॥

સર્વં લભેત્ સર્વકામી નિષ્કામી તત્ફલં લભેત્ ।
(અથ સ્તોત્રમ્ ।)
ૐ વિદ્યાગણપતિર્વિઘ્નહરો ગજમુખોઽવ્યયઃ ॥ ૯॥

વિજ્ઞાનાત્મા વિયત્કાયો વિશ્વાકારો વિનાયકઃ ।
વિશ્વસૃગ્વિશ્વભુગ્વિશ્વસંહર્તા વિશ્વગોપનઃ ॥ ૧૦॥

વિશ્વાનુગ્રાહકઃ સત્યઃ શિવતુલ્યઃ શિવાત્મજઃ ।

વિચિત્રનર્તનો વીરો વિશ્વસન્તોષવર્ધનઃ ॥ ૧૧॥

વિમર્શી વિમલાચારો વિશ્વાકારો વિનાયકઃ ।
સ્વતન્ત્રઃ સુલભઃ સ્વર્ચ્યઃ સુમુખઃ સુખબોધકઃ ॥ ૧૨॥

સૂર્યાગ્નિશશિદૃક્ સોમકલાચૂડઃ સુખાસનઃ ।
સ્વપ્રકાશઃ સુધાવક્ત્રઃ સ્વયં વ્યક્તઃ સ્મૃતિપ્રિયઃ ॥ ૧૩॥

શક્તીશઃ શઙ્કરઃ શમ્ભુઃ પ્રભુર્વિભુરુમાસુતઃ ।
શાન્તઃ શતમખારાધ્યશ્ચતુરશ્ચક્રનાયકઃ ॥ ૧૪॥

કાલજિત્ કરુણામૂર્તિરવ્યક્તઃ શાશ્વતઃ શુભઃ ।
ઉગ્રકર્મોદિતાનન્દી શિવભક્તઃ શિવાન્તરઃ ॥ ૧૫॥

ચૈતન્યધૃતિરવ્યગ્રઃ સર્વજ્ઞઃ સર્વશત્રુભૃત્ ।
સર્વાગ્રઃ સમરાનન્દી સંસિદ્ધગણનાયકઃ ॥ ૧૬॥

સામ્બપ્રમોદકો વજ્રી માનસો મોદકપ્રિયઃ ।
એકદન્તો બૃહત્કુક્ષિઃ દીર્ઘતુણ્ડો વિકર્ણકઃ ॥ ૧૭॥

બ્રહ્માણ્ડકન્દુકશ્ચિત્રવર્ણશ્ચિત્રરથાસનઃ ।
તેજસ્વી તીક્ષ્ણધિષણઃ શક્તિવૃન્દનિષેવિતઃ ॥ ૧૮॥

પરાપરાશ્ચ પશ્યન્તી પ્રાણનાથઃ પ્રમત્તહૃત્ ।
સઙ્ ક્લિષ્ટમધ્યમઃસ્પષ્ટો વૈખરીજનકઃ શુચિઃ ॥ ૧૯॥

ધર્મપ્રવર્તકઃ કામો ભૂમિસ્ફુરિતવિગ્રહઃ ।
તપસ્વી તરુણોલ્લાસી યોગિનીભોગતત્પરઃ ॥ ૨૦॥

જિતેન્દ્રિયો જયશ્રીકો જન્મમૃત્યુવિદારણઃ ।
જગદ્ગુરુરમેયાત્મા જઙ્ગમસ્થાવરાત્મકઃ ॥ ૨૧॥

નમસ્કારપ્રિયો નાનામતભેદવિભેદકઃ ।
નયવિત્ સમદૃક્ શૂરઃ સર્વલોકૈકશાસનઃ ॥ ૨૨॥

વિશુદ્ધવિક્રમો વૃદ્ધઃ સંવૃદ્ધઃ સસુહૃદ્ગણઃ ।
સર્વસાક્ષી સદાનન્દી સર્વલોકપ્રિયઙ્કરઃ ॥ ૨૩॥

સર્વાતીતઃ સમરસઃ સત્યાવાસઃ સતાં ગતિઃ ।

ઇતિ વિદ્યાગણેશસ્ય નામ્નામષ્ટોત્તરં શતમ્ ॥ ૨૪॥

યઃ પઠેચ્છૃણુયાદ્વાપિ નિત્યં ભક્તિસમન્વિતઃ ।
તસ્ય સાધકવર્યસ્ય સર્વાવસ્થાસુ સર્વદા ।
નાસાધ્યમસ્તિ કિમપિ વિદ્યાવિઘ્નેશ્વરાત્મનઃ ॥ ૨૫॥

॥ ઇતિ મહાશૈવતન્ત્રે અતિરહસ્યે આકાશભૈરવકલ્પે શઙ્કરવિરચિતે
શ્રીવિદ્યાગણેશાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Sreenivasa Rao Bhagavatula

*Shri Vidya Ganesha Ashtottarashatanama Stotram*
pdf was typeset on February 13, 2021

Please send corrections to *sanskrit@cheerful.com*